# दक्षिणामूर्ति स्तोत्रं

विश्वं दर्पण दृश्यमान नगरी तुल्यं निजान्तर्गतं
पश्यन्नात्मनि मायया बहिरिवोद्भूतं यथा निद्रया ।
यः साक्षात्कुरुते प्रबोध समये स्वात्मान मेवाद्वयं
तस्मै श्रीगुरुमूर्तये नम इदं श्रीदक्षिणामूर्तये ॥ १॥

बीजस्यान्तरि वाङ्कुरो जगदिदं प्राङ्निर्विकल्पं पुनः
मायाकल्पित देशकाल कलना वैचित्र्य चित्रीकृतम् ।
मायावीव विजृम्भयत्यपि महा योगीव यः स्वेच्छया
तस्मै श्रीगुरुमूर्तये नम इदं श्रीदक्षिणामूर्तये ॥ २॥

यस्यैव स्फुरणं सदात्मक मसत् कल्पार्थकं भासते
साक्षात्तत्त्व मसीति वेद वचसा यो बोधय त्याश्रितान् ।
यत्साक्षा त्करणाद्भवेन्न पुनरावृत्ति र्भवाम्भोनिधौ
तस्मै श्रीगुरुमूर्तये नम इदं श्रीदक्षिणामूर्तये ॥ ३॥

नानाच्छिद्र घटोदर स्थित महा दीपप्रभा भास्वरं
ज्ञानं यस्य तु चक्षुरादि करण द्वारा बहिः स्पन्दते ।
जानामीति तमेव भान्त मनुभात्येतत्समस्तं जगत्
तस्मै श्रीगुरुमूर्तये नम इदं श्रीदक्षिणामूर्तये ॥ ४॥

देहं प्राण मपीन्द्रिया ण्यपि चलां बुद्धिं च शून्यं विदुः
स्त्रीबालान्ध जडोपमा स्त्वहमिति भ्रान्ता भृशं वादिनः ।
मायाशक्ति विलास कल्पित महा व्यामोह संहारिणे

तस्मै श्रीगुरुमूर्तये नम इदं श्रीदक्षिणामूर्तये ॥ ५॥

राहुग्रस्त दिवाकरेन्दु सदृशो माया समाच्छादनात्
सन्मात्रः करणोप संहरणतो योऽभूत्सुषुप्तः पुमान् ।
प्रागस्वाप्स मिति प्रबोध समये यः प्रत्यभिज्ञायते
तस्मै श्रीगुरुमूर्तये नम इदं श्रीदक्षिणामूर्तये ॥ ६॥

बाल्यादिष्वपि जाग्रदादिषु तथा सर्वा स्ववस्थास्वपि
व्यावृत्तास्वनु वर्तमान महमित्यन्तः स्फुरन्तं सदा ।
स्वात्मानं प्रकटी करोति भजतां यो मुद्रया भद्रया
तस्मै श्रीगुरुमूर्तये नम इदं श्रीदक्षिणामूर्तये ॥ ७॥

विश्वं पश्यति कार्य कारणतया स्वस्वामि संबन्ध तः
शिष्याचार्य तया तथैव पितृपुत्राद्यात्मना भेदतः ।
स्वप्ने जाग्रति वा य एष पुरुषो माया परिभ्रामितः
तस्मै श्रीगुरुमूर्तये नम इदं श्रीदक्षिणामूर्तये ॥ ८॥

भूरम्भां स्यनलोऽनिलोऽम्बर महर्नाथो हिमांशुः पुमान्
इत्याभाति चराचरात्मक मिदं यस्यैव मूर्त्यष्टकम् ।
नान्यत्किञ्चन विद्यते विमृशतां यस्मा त्परस्मा द्विभोः
तस्मै श्रीगुरुमूर्तये नम इदं श्रीदक्षिणामूर्तये ॥ ९॥

सर्वात्मत्व मिति स्फुटी कृतमिदं यस्मा दमुष्मिन् स्तवे
तेनास्य श्रवणात्तदर्थ मननाद्ध्यानाच्च सङ्कीर्तनात् ।
सर्वात्मत्व महाविभूति सहितं स्यादीश्वरत्वं स्वतः

सिद्ध्ये त्तत्पुनरष्ट धा परिणतं चैश्वर्य मव्याहतम् ॥ १०॥

वटविटपि समीपेऽ भूमिभागे निषण्णं
सकलमुनि जनानां ज्ञान दातार मारात् ।
त्रिभुवन गुरुमीशं दक्षिणामूर्ति देवं
जनन मरण दुःखच्छेद दक्षं नमामि ॥

इति श्रीमच्छङ्करभगवतः कृतौ दक्षिणामूर्त्यष्टकं सम्पूर्णम् ।